Devi KanyakumAri Varnadyakshara Gitanjali

# देवी कन्याकुमारि वर्णाद्याक्षर गीताञ्जलिः

## Document Information

Text title : Devi KanyakumAri Varnadyakshara Gitanjali

File name : kanyAkumArivarNAdyAkSharagItAnjaliH.itx

Category : devii, kRitI, devI

Location : doc_devii

Author : Smt. Rajeshwari Govindaraj

Transliterated by : Smt. Rajeshwari Govindaraj

Proofread by : Smt. Rajeshwari Govindaraj

Latest update : December 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# देवी कन्याकुमारि वर्णाद्याक्षर गीताञ्जलिः

## १. “अ”कार गीतम् ।

अखंड ब्रह्मांड नगरेश्वरीम् ।
अनुदिनं स्मर कन्याकुमारीम् ॥ पल्लवि ॥

प्रसन्नवदनां कुंदरदनां
मुक्तिनिकेतनां कारुण्यनयनाम् ।
स्मर नित्यं स्मर विनीतावनां
दुष्टगुण परिवर्तन लीनाम् ॥ १ ॥

श्रुतिस्मृतिसूक्ति संहर्षिणीं
आगमशास्त्र धर्मबोधिनीम् ।
ज्ञानसंजीविनीं गीतसुधावनीं
योगीश समदर्शि संपोषिणीम् ॥ २ ॥

## २. “आ”कार गीतम् ।

आश्रयामि श्री कन्याकुमारीम् ।
आराधयामि देवीं मोदकरीम् ॥ पल्लवि ॥
भूषिराधीश्वरीं विश्वसुंदरीं
कारुण्यसागरीं गीतसुधाधरीम् ।
राजीव नयनां राजीववदनां
राजीवचरणां ध्यायामि अनुक्षणम् ॥ १ ॥

मधुर सद्भक्तिलास्य रंजनीं
योगीश समदर्शि संपोषिणीम् ।
सुप्त प्रतिभाशुजागरिणीं
गुप्तगामिनीं कुंडलिनीम् ॥ २ ॥

## ३. “इ”कार गीतम् ।

इंदुशेखर परमप्रिय सखी ।
कन्याकुमारि स्वांतःसुखी ॥ पल्लवि॥

उपासित ब्रह्मदेवदत्तवरः
तपोनिष्ठ मदोन्मत्त बाणासुरः ।
अनिमिष ऋषिसाधुसंत हिंसकः
तस्य वधार्थमवतारिणि ॥ १॥

भूषिरमंदिर लोकैकसुंदरि
शिरीषसुमोपम शरीरधरि ।
पराविद्या पयोनिधीश्वरि
भ्रांतिमोहहरि गीतसुधाधरि ॥ २॥

## ४. “ई”कार गीतम् ।

ईप्सितप्रपूरिणि परांबिके ।
हे कन्याकुमारि भवतारके ॥ पल्लवि॥

सुधावल्लि उपनिषद्गोचरे
असदृश दीप्तियुते साकारे ।
योगसेवासंप्रीते रुचिरे
त्यागयोगोपासिते मधुरे ॥ १॥

वरदमुद्रायुते हरभामिनि
षण्मुखगजमुख माते रंजनि ।
रसिकसुजन मानसाह्लादिनि
धारणाबलं यच्छ गीतसुधावनि ॥ २॥

## ५. “उ”कार गीतम् ।

उपनिषत्सागरे मम नाविका भव ।
कन्याकुमारि ज्ञानप्रदा भव ॥ पल्लवि॥

चंद्रशेखरे ललिते कल्पवल्लि
चंद्रशेखरसखि अमृतवल्लि ।
जमदग्निनंदन प्रतिष्ठिते
जीवसंस्करण कार्यनिरते ॥ १॥

चिद्पावकसंभूते सुचरिते
भ्रामरीगुह निवासिते गानरते ।
मुक्तिदाते देवकार्यसदारते
हिमाद्रिसंजाते गीतसुधाश्रिते ॥ २॥

## ६. “ऊ”कार गीतम् ।

ऊर्ध्वगतिप्रियं मां पालय ।
सन्मतिं दत्वा मां परिपालय ॥ पल्लवि॥

सत्यासत्यभेद ज्ञानं यच्छ
सुखदुःखदर्शने समतां प्रयच्छ ।
ऋतशक्ति जयमेकमात्मदर्शनं
इति मां बोधय कन्याकुमारि ॥ १॥

चिदाकाशांतरे साक्षिणि पोषय
मूर्खदास गुरुहृदये मां स्थापय ।
अविद्या बाणासुरसूदनी भव
श्रितरक्षिणि गीतसुधावनी भव ॥ २॥

## ७. “ऋ”कार गीतम् ।

ऋग्वेदादि चतूर्वेदार्थ दिपिके ।
कन्याकुमारि सुज्ञानचंद्रिके ॥ पल्लवि॥

अपौरुषेय वेदवाङ्मयसारे
शृतिस्मृति संपूजिते रुचिरे ।
आगम षड्दर्शन गीतासद्दर्शिते
पुराणोपपुराण सुवर्णिते ॥ १॥

विश्वव्यापक भाषांतर्यामिनि

विस्मयरीत्या भावांतर्गामिनि ।
विचार विश्लेषण विधिनिरूपिणि
कन्याकुमारि गीतसुधावनि ॥ २॥

## ८. "ऋ"कार गीतम् ।

ऋ इत्यष्टमाक्षर विराजिते ।
ऋषिसंप्रदाय रक्षण निरते ॥ पल्लवि॥

मननमंथन चिंतनकारिणि
स्फुरणसृजन कल्पनोद्दीपिनि ।
कन्याकुमारि पंचकोशव्यापिनि
भूषिरजननि गीतसुधावनि ॥ १॥

सम्यग्दर्शिकृत ग्रंथसारे
सम्यग्ज्ञानप्रदे साकारे ।
निराकारे निर्विकारे
निर्ममस्य हृद्गुह गोचरे ॥ २॥

## ९. "ए"कार गीतम् ।

एकैक परतत्त्वरूपिणि ।
अद्वितीय प्रकृतिरूपिणि ॥ पल्लवि॥

सर्वयंत्ररूपिणि सर्वमंत्रजननि
सर्वतंत्रकारिणि सर्वशक्तिदायिनि ।
जननमरण चक्रसंचालिनि
देशकाल दिक्कारणि ॥ १॥

अप्रमेये सदये सरसवति
अनिर्वचनीये अमेये भगवति ।
नित्यशुद्ध बुद्धमुक्तरूपिणि रागिणि
सच्चिदानंद रूपिणि सरोजिनि ॥ २॥

## १०. “ऐ”का गीतम् ।

ऐहिक मोदाकर्षण वशोऽ हम् ।
मोघाशोऽहं सत्यविमुखोऽहम् ॥ पल्लवि॥

वह मम योगक्षेमं भवानि
देवि कन्याकुमारि श्रितपावनि ।
बालदिनकरकोटि प्रभासंयुते
बाणासुरासुहरण रंजिते विजिते ॥ १॥

पंचशरहर शिवार्धांगिनि
पंचभूतात्मक जगद्रक्षिणि ।
पंचक्लेश हारिणि प्रमोदिनि
पंचकोशव्यापिनि गीतसुधावनि ॥ २॥

## ११. “ओ”कार गीतम् ।

ओजस्विनि चंद्रभानुनयने ।
कन्याकुमारि भूषिरसदने ॥ पल्लवि ॥

सुरवंशारिकुल विध्वंसिनि
मुनियतिगुरुबुध ध्येयपालिनि ।
जीवकोटि प्राणपोषिणि कन्ये
पूर्णसुधांशुमुखि आराध्ये ॥ १॥

पालय मां सदा परमज्ञेये
परिवर्तय मां परमध्येये ।
छिन्नसंशय मोदप्रदायिनि
षड्वैरि दूरिणि गीतसुधावनि ॥ २॥

## १२. “औ”कार गीतम् ।

औन्नत्य वित्तार्जन विधानम् ।
बोधयांबिके मे अनुदिनम् ॥ पल्लवि॥

ज्ञानभिक्षां देहि भवति

कन्याकुमारि हे अंबे भगवति ।
त्वमेव माते भवतारिणि
त्वमेव त्राते भीतिनाशिनि ॥ १॥

षड्चक्रोद्दीपिन दीप्तिमणि
गीतसुधावनि श्रितचिंतामणि ।
साधनरत साफल्यदायिनि
प्रसन्नमनस्क प्रमोदिनि ॥ २॥

## १३. “अं”कार गीतम् ।

अंबुधित्रय संगमतटालये ।
अंबुजपदद्वये यशोदये ॥ पल्लवि॥

ऋषिमुनि दिविजेंद्र प्रार्थित जननि
कन्याकुमारि रूपावतारिणि ।
दैत्यराज बाणासुरसूदनि
शुभसंदायिनि गीतसुधावनि ॥ १॥

कांतिपूर्ण नासाभरणधरि
कारूण्यपूर्णे गोविंदसोदरि ।
आपादमस्तक नयनप्रिये
आजीवपर्यंत जीवाश्रये॥ २॥

## १४. “अः”कार गीतम् ।

आह्लाददायिनि परांबिके ।
धर्मार्थ कामप्रदायिके ॥ पल्लवि॥

नवरसलास्य निरते श्रीललीते
नवकांति लावण्य सौंदर्ययुते ।
परमाद्भुतं तव लोकरक्षणं
कल्पनातीतं तव जीवलक्षणम् ॥ १॥

परम वात्सल्ययि सृष्टिसंचालिनि
चिदानंदमयि सच्चित्स्वरूपिणि ।

अंबोनिधित्रय संगमेश्वरि
ब्रह्मचारिणि गीतसुधेश्वरि ॥ २॥

## १५. “क”कार गीतम् ।

कन्याकुमारि योगविद्या-
पीठाधीश्वरि मामुद्धर ॥ पल्लवि॥

अस्माकं गुरुकुलं चिरकालं
ज्ञानविज्ञानप्रद धाममस्तु ।
शमदमसंपन्न साधकवृंदा-
श्रितमस्तु योगनंदनमस्तु ॥ १। ।
ओंकार नादानुसंदाने मम
चित्तमस्तु तल्लीनमस्तु ।
ज्ञानदीपांकुरि कुपासागरि
नित्यशुभंकरि गीतसुधाकरि ॥ २॥

## १६. “ख”कार गीतम् ।

खगराजवाहन प्रियसोदरि ।
वरदमुद्राधरि कन्याकुमारि ॥ पल्लवि॥

कांचन कंकण नूपुरभूषिते
नवरत्न किरीट हारविराजिते ।
त्रितापत्रस्त भक्तसंरक्षिणि
त्रिलोकपालिनि मूर्खदास जननि ॥ १॥

जपमालाधरि भूषिरेश्वरि
शिष्टशुभंकरि दुष्टभयंकरि ।
कायवाङ्मनोबलं प्रसादय
गीतसुधावनि योगपथं गमय ॥ २॥

## १७. “ग”कार गीतम् ।

गुरुहृदयांतर् दीप्ति प्रसारिणि
परमगुरुरूपिणि त्रिलोचनि ॥ पल्लवि॥

जीवनशास्त्रज्ञान प्रबोधीनि
जीवरहस्य विज्ञान प्रकाशिनि ।
धारणध्यानरत मार्गदर्शिनि
समाधिलीन ज्ञेयाकारिणि ॥ १॥

काम्यकर्मरहितो निजगुरुरूपः
देहभाववर्जितो सद्गुरुरूपः ।
दक्षिणामूर्तिगुरु प्रियरमणि
गुरुस्कंदजननि गीतसुधावनि ॥ २॥

## १८. “घ”कार गीतम् ।

घनहिमशैलेंद्र सुकुमारि
निचोलांचलधरि कन्याकुमारि ॥ पल्लवि॥

भक्तकोटिपूजिते अपराजिते
कृतकृत्ययोगि पराभक्तिजिते ।
धर्मनारीपीठ चक्रवर्तिनि
मतवर्ण जातिकुल मैत्रिमोदिनि ॥ १॥

संस्कृतिरक्षण तत्पररक्षिणि
प्रकृतिविकोप परिणामसाक्षिणि ।
विकृतभाववश दुष्टध्वंसिनि
गीतसुधावनि शिष्टपालिनि ॥ २॥

## १९. वा“ङ”कार गीतम् ।

वाङ्मय साम्राज्य चक्रवर्तिनि ।
साहित्य संगीतामृत वाहिनि ॥ पल्लवि॥

अक्षरमालाधारिणि शांभवि

सप्तस्वर वज्रहारधरि देवि ।
अनिमिषवैरिसमूह सूदनि
कन्याकुमारि त्रिशरधि तटवासिनि ॥ १॥

अणुरेणुतृणकाष्ठ व्यापिनि
जीवकोटिस्पंदन शक्तिसंचालिनि ।
समस्त ब्रह्मंड भांडोदरि
ज्योतिर्गमय गीतसुधाधरि। ॥ २॥

## २०. "च"कार गीतम् ।

चंद्रमुखी श्री कन्याकुमारी ।
चंद्रशेखरसखी अवतु माम् ॥ पल्लवि॥

रम्य निचोलांचल धारिणी
नव्य ललाटिका कंकणभूषिणी ।
असमाद्भुत दिव्यकांतामणी
अनुपम सुचरिता अवतु माम् ॥ १॥

रत्नताटंकयुगल शोभिनी
स्वर्णनूपुरधरी गीतसुधावनी ।
ओष्टरागरहितापि अरुणाधरा
चंदनरहितापि सुगंधप्रसारा। ॥ २॥

## २१. "छ"कार गीतम् ।

छायावत्मम चित्तमस्तु विधेयम् ।
मायावश मम जीवमस्तु निरामयंम् ॥ पल्लवि॥

कालचक्रे मम कायमस्ति विकारमयं
कर्मचक्रे मम चित्तमस्ति संस्कारमयम् ।
कथमस्ति मम चित्तवृत्तिनिरोधः
कदास्ति मयि योगानुशासनम् ॥ १॥

सहस्त्र सहस्त्र शास्त्रप्रमाण
ग्रहण गमनविधानं न जानामि ।

अंतर्गुरुमाते कन्याकुमारि
गीतसुधावनि नित्यशुभंकरि ॥ २॥

## २२. “ज”कार गीतम् ।

जीवजगत्पावनि सिद्धिप्रदे
जितमानसवरप्रदे सुप्रदे ॥ पल्लवि॥

कन्याकुमारियोगिदर्शिते
कन्याकुमारि भूषिरमाते ।
अंबुराशि तरंग नाट्यनिरते
अंबोनिधिघोष मंत्रप्रीते ॥ १॥

लोकसंग्रहकर्मे नित्याश्रिते
लोकत्रयत्राते मंदस्मिते ।
ब्रह्मचारिणि गीतसुधावनि
सुचींद्रनाथ शिवार्धांगिनि ॥ २॥

## २३. “झ”कार गीतम् ।

झंकारिणिधर परमाप्तभामिनि ।
ह्रींबीजाक्षर शक्तिस्वरूपिणि ॥ पल्लवि॥

भुवनसम्मोहिनि अब्धिनंदनमुखि
हरशिरशोभिनि गंगा नित्यसखि ।
सौगंधिका चंपका मल्लिका
रजनीगंध मालती रसिका ॥ १॥

पनस नारिकेल दाडिम जंबू
आम्रकदली द्राक्षानि खादय ।
भक्ष्य भोज्य लेह्यचोष्यानि
स्वीकुरु शंकुरु भुवनैकगुरुजननि ॥ २॥
तव दृष्टिमात्रेण कन्याकुमारि
सर्वं पावनमस्ति गंगामैत्रिधरि ।
तव स्पर्शमात्रेण हे माहेश्वरि

सर्वममृतमस्ति गीतसुधाकरि ॥ ३॥

## २४. ज“ञ” ज्ञकार गीतम् ।

ज्ञानजलधि स्नाने खेल मानस ।
कन्याकुमारि ध्याने रमय ॥ पल्लवि॥

आकाश वायु वह्नि जल धरा-
मय प्रपंचे देवीं भावय ।
सत्वरजस्तमो गुणत्रय
कर्मक्षेत्रे गीतसुधामास्वादय ॥ १॥

तत्त्व नवरत्नानि अन्वेषय
आत्मपरमात्म संगमे मोदय ।
ध्यातृ ध्यान ध्येय भेदमस्तु लीनं
ज्ञातृ ज्ञान ज्ञेयभेदमस्तु विलीनम् ॥ २॥

## २५. “ट”कार गीतम् ।

टीकाकार वर्णित सर्वशक्तिधरि ।
सर्वरूपधरि कन्याकुमारि ॥ पल्लवि॥

कल्पतरुसदृश चरणसरोजिनि
कल्पनातीत लीलाविलासिनि ।
योगमार्गगामी संचालिनि
भक्तहृदयालये विराजिनि ॥ १॥

चिच्छक्तिरूपिणि चिदानंददायिनि
भ्रामरी गुहांतर्निवासिनि ।
सुगंधिनि सुकेशिनि सुवासिनि
श्रीकांतभगिनि गीतसुधावनि ॥ २॥

## २६. पा“ठ”कार गीतम् ।

पाठप्रवचने मां चतुरं कुरु ।

पतितपावनि मां स्थिरचित्तं कुरु ॥ पल्लवि॥

क्षमाकवचदे सुगुणप्रदे
परिपालय मां आशुवरप्रदे ।
भूषिरालयस्थिते कन्याकुमारि
साधकविनुते भुवनेश्वरि ॥ १॥

कौमारि सद्भावसंजीविनि
माहेश्वरि शशिशेखर रमणि ।
सुरवैरिदमनि दुरितविदूरिणि
चिदानंदरूपिणि गीतसुधावनि ॥ २॥

## २७. “ड”कार गीतम् ।

डमरुपाणिसति कन्याकुमारि ।
डमरुनिनादप्रिये भुवनेश्वरि ॥ पल्लवि॥

निरालंब प्रमोदप्रदे
निरतिशय दिव्यज्ञानप्रदे ।
देहकरणकृत कर्मसुफलदे
मनोमतिचित्ताराधन बलदे। ॥ १॥

त्रिपुरसुंदरि देवि त्र्यक्षरि
त्रिगुणलास्यकरि पंचदशाक्षरि ।
त्रिदेविशक्तिधरि गीतसुधाधरि
तप्तहृदय सुखकरि निर्भयकरि ॥ २॥

## २८. “ढ”कार गीतम् ।

ढक्कावादन विशारदराणि ।
दिव्यज्ञानदायिनि लोकजननि ॥ पल्लवि॥

त्रिपुरवासिनि षड्वैरिदमनि
त्रिगुणनियंत्रिणि गीतसुधावनि ।
चपलचित्त दोषापहारिणि
छिन्नसंशय मोदप्रदायिनि। ॥ १॥

भक्तिमाधुर्यरते श्री ललिते
दासोऽहंभाव संप्रीते ।
सोऽहमनुभाव स्थितिदाते
कन्याकुमारि चिदग्निभूते ॥ २॥

## २९. अ“ण”कार गीतम् ।

अणुकोटि सहस्रचलनकरि ।
अष्टसिद्धीश्वरि कन्याकुमारि ॥ पल्लवि॥

अविद्यांधकार वारिणि
अस्मिता मेघावरण दूरिणि ।
रागद्वेषमय बंधमोचनि
अभिनिवेश क्लेशाशुरागिणि ॥ १॥

भक्तिसुखास्वादने कंपनं
नामस्मरणह्लादे रोमांचनम् ।
भक्तिपारवश्ये गद्गदकंठं
देहि मे अश्रु स्वेदं गीतसुधावनि ॥ २॥

तव ध्यान तन्मयता यच्छतु वैवर्ण्यं
तव ज्ञानलीनता करोतु मां स्तब्धम् ।
तव साक्षात्कारे अस्तु मम प्रलयं
गीतसुधावनि वह मम योगक्षेमम् ॥ ३॥

## ३०. “त”कार गीतम् ।

तपोव्रते वरदमुद्रायुते
कन्याकुमारि जपमाला सहिते ॥ पल्लवि॥

सर्व यंत्रात्मिके सर्वतंत्रात्मिके
सर्व मंत्रात्मिके सर्वानुशासके ।
स्थावरजंगम भेदरहिते
प्राणशक्तिसंचालिनि जीवहिते ॥ १॥

दृश्य विश्वांतरे पंचभूतरूपिणि
अदृश्यावस्थे पंचतन्मात्राजननि ।
    युगयुगांतस्थिते। भूषिरेश्वरि
    पंचबाणारिप्रिये गीतसुधेश्वरि ॥ २॥

## ३१. र"थ"कार गीतम् ।

रथोपम कायस्य सारथि त्वम् ।
ज्ञेये हि त्वं ध्येयेऽपि त्वम् ॥ पल्लवि॥

मनोप्रग्रह नियंत्रकः नाहं
वशहीनकरणहयादासोऽहम् ।
    मनस्साक्षि घंटानादतन्मयी
    शमदमबलं प्रद मे चिन्मयी ॥ १॥

बाले विमले ज्ञानदीप स्थापिनि
आश्रितवत्सले निष्ठोद्दीपिनि ।
    कन्याकुमारि अब्दिनंदनमुखि
    त्रिभुवनसुंदरि। नित्यगंगासखि ॥ २॥

## ३२. "द"कार गीतम् ।

दिव्यज्ञानदाते भजनसुधाप्रीते ।
देहकरण वाङ्मनोबल प्रदाते। ॥ पल्लवि॥

कन्याकुमारि सहस्रजिह्वस्तुतिप्रीते
भूषिरेश्वरि सहस्रनयनार्चिते ।
    बाणासुरवधार्थं संजाते
    कुशलं कुरु मे यज्ञोदिते ॥ १॥

षड्वक्रोपरिशोभिनि योगिनि
नवभाव तरंगिणि गीतसुधावनि ।
    ओंकार बीजाक्षरि पाहि मां
    ह्रींकारबीजाक्षरि त्राहि माम् ॥ २॥

## ३३. “ध”कार गीतम् ।

धर्मपीठाध्यक्षणि त्रिभुवन जननि ।
दृश्यादृश्य पदार्थ संपोषिणि ॥ पल्लवि॥

तत्त्वमसि बोधने गोचरि
स्वात्मसुखप्रदे गीतसुधाकरि ।
अवाङ्मानसगम्ये सुगुणसुधाधरि
आनंदमयकोश धामेश्वरि ॥ १॥

महाविषादभीरु संश्रिते
महाप्रमोद वरदाननिरते ।
द्वंद्वतरंगमय सागरतारिणि
द्वंद्वातीते कन्याकुमारि हरिणि ॥ २॥

## ३४. “न”कार गीतम् ।

नवतारुण्ययुते असमलावण्ययुते ।
शृणु मम भावान् ऋषिगणविनुते ॥ पल्लवि॥

उक्त्वा तव तत्त्वविशेष पदान्
बध्वा मानसं हृष्यामि अंबिके ।
पृष्ट्वा परिप्रश्नानि गुरून्
ज्ञात्वा सत्यतत्वं राजहंसिके ॥ १॥

शृत्वा तव महिमा विशेषान्
स्तुतिरत्न भूषणान् दत्वा धन्योऽस्मि ।
नवरसानुभव रसतरंगिणि
कन्याकुमारि गीतसुधास्वादिनि ॥ २॥

## ३५. “प”कार गीतम् ।

प्रसीद प्रसीद कन्याकुमारि ।
पालय मां नित्यानंदकरि ॥ पल्लवि॥

पयोनिधिशयन सुप्रियभगिनि

भालनयनार्धांगिनि चिद्रूपिणि ।
बाणासुरसूदनि बालामणि
शरणागतभक्त चिंतामणि ॥ १॥

विद्युल्लतासदृशगात्रि
दयापूर्ण चारुनेत्रि ।
मौक्तिकहारालंकृत कंधरे
गीतसुधाधारे मंदस्मेरे। ॥ २॥

## ३६. “फ”कार गीतम् ।

फलनिरीक्षणं मम दूरी कुरु ।
जलरुहनयने अर्पणं स्वीकुरु। ॥ पल्लवि॥

जीवभाव बद्धोऽहं कर्मचक्रलीनः
द्वंद्वभाव सहितोऽहं मोदहीनः ।
भावशुद्धिं कृत्वा मनःप्रसादं दत्वा
परामोदं प्रद स्तोत्रं शृत्वा ॥ १॥

मोहक स्वर्णाभरणभूषिणि
कांतियुत नासाभरण राजिनि ।
विषकंधरप्रिये विनायकजननि
श्रीकांतसोदरि गीतसुधावनि ॥ २॥

## ३७. “ब”कार गीतम् ।

ब्रह्मतत्वरूपिणि हे भवानि ।
स्वर्गावनिपाताल स्वामिनि ॥ पल्लवि॥

संवित्सागरि बुधचित्तापहरि
साधकाभयकरि बहुरूपधरि ।
धर्माधर्मातीते शुभचरिते
सागरलहरि सुघोषसंस्तुते। ॥ १॥

त्रिगुणातिते त्रिदेहसेविते
त्रिभुवनाराधिते उपासकदर्शिते ।

क्षमाकरि कृपाकरि कौमारि
गीतसुधाकरि कन्याकुमारि। ॥ २॥

## ३८. “भ”कार गीतम् ।

भूषिरमंदिर निकेतने ।
भवबंधमोचनि मोदसदने। ॥ पल्लवि॥

त्रितापहारिणि मंदस्मिते
त्रिनेत्ररमणि गुहगणप माते ।
त्रिकालाबाधिते जपमालाधारिणि
त्रिलोकपालिनि त्रिलोचनि ॥ १॥

प्रपत्तिपूर्ण कृपावर्षिणि
विक्षिप्तचित्त दुरितापहारिणि ।
हृल्लेखारूपिणि साधकपावनि
मम हृत्खेलिनि गीतसुधावनि ॥ २॥

## ३९. “म”कार गीतम् ।

महादेवार्धांगिनि पाहि मां
कन्याकुमारि गौरि त्राहि माम् ॥ पल्लवि॥

समुद्रे तु तरंगमस्ति
तरंगे नास्ति पयोनिधिः ।
तवोदरे अहमस्मि भगवति
सर्वदा त्वमसि मयि शिवसति ॥ १॥

समष्टि तत्त्वजनितः व्यष्टिः
व्यष्टिः कदापि नास्ति समष्टिः ।
अणुमहद्व्यापिनि गीतसुधावनि
अंडपिंडजननि ब्रह्मांडरूपिणि ॥ २॥

## ४०. “य”कार गीतम् ।

योगमाये विष्णुसहोदरि ।
मम दुरितानि हर कन्याकुमारि ॥ पल्लवि॥

शब्द स्पर्श रूप रस गंध-
तन्मात्रा जननि सृष्टिसंपोषिणि ।
कैलासाधिप मनोल्लासिनि
मातंगवदनस्तुत गिरिनंदिनि ॥ १॥

प्रपन्नसाधक तेजोवर्धिनि
प्रोल्लासिनि सृजनक्रीडारंजनि ।
अब्धिघोषश्रवणे प्रणवदर्शिनि
अक्षयशक्तिवाहिनि गीतसुधावनि ॥ २॥

## ४१. “र”कार गीतम् ।

रुंडमालाधरि। ईश्वरि गौरि
सुरेश्वरि परमेश्वरि कन्याकुमारि ॥ पल्लवि॥

भुवनैकसुंदरि भूषिरेश्वरि
स्वर्णकंकणधरि जपमालाधरि ।
रमणीयधामे प्रतिष्ठिते
श्रीमाते रक्ष मां गीतसुधानुते ॥ १॥

भक्त ज्ञानि बुध प्राज्ञ शक्तिस्रोते
काव्य साहित्य रत स्नेहप्रमोदिते ।
रजोगुण तमोगुण मग्नोद्धारिणि
भवरमणि भवहारिणि सुनयनि ॥ २॥

## ४२. “ल”कार गीतम् ।

लीलानाटक रंगमंटपे
नटीनटपात्रधरी त्वमेव ॥ पल्लवि॥

ह्रींकार बीजाक्षरी त्वमेव

ओंकारबीजाक्षरी मामव ।
सहस्रारकमले शोभिनि योगिनि
नवरस रागालापिनि विरागिणि ॥ १॥

त्रिदेहप्रतिष्ठिते देहातीते
कुशलं कुरु मे भव यज्ञोदिते ।
जिज्ञासुवेष्टिते नित्योपासिते
गीतसुधाश्रिते शैलेंद्रसुकुमारि ॥ २॥

## ४३. “व”कार गीतम् ।

विज्ञानदीपाश्रय दायिनि ।
विनीतमनस्क मुददायिनि ॥ पल्लवि॥

पंचविषयवासना वारिणि
तार्किक विचार तुलनबोधिनि ।
आशापाशाबंधित विमोचनि
भूषिरजननि गीतसुधावनि ॥ १॥

जीवनसमरांगण साक्षिणि
जीवापजयविजय स्वामिनि ।
ज्ञानविवर्धिनि दर्शय शोधय
धर्मस्थापिनि प्रसीद पालय ॥ २॥

## ४४. “श”कार गीतम् ।

शतशतापराधाणि मया कृतानि ।
जीवोद्धारिणि क्षमस्व पावनि। ॥ पल्लवि॥

दिव्यजन्मधारिणि श्रीपद्मचरणे
देदीप्यमान नासाभरणे ।
अनिमिषगण समाराधिते
महर्षिवृंदोपासिते गीतसुधास्तुते ॥ १॥

त्वमेव गतिर्मम कन्याकुमारि
श्री कन्यका परमेश्वरि गौरि ।

त्वया विना हे राजराजेश्वरि
नाहमस्मि देवी सुधीश्वरि ॥ २॥

## ४५. “ष”कार गीतम् ।

षड्वक्रमार्ग गामिनि अंबिके
कन्याकुमारि योगिहृच्चंद्रिके ॥ पल्लवि॥

निरवधिप्रमोद प्रदायिनि
निरुपमलीलाकरि सुहासिनि ।
वेदोपनिषद्वाणि कल्याणि
नीरधित्रयमंदिर विहारिणि ॥ १॥

अक्षररूपिणि ज्योतिर्मयि
अक्षयमोददे हिरण्मयि ।
धर्मपालक भक्तोद्धारिणि
गंगाधरभामिनि गीतसुधाजननि ॥ २॥

## ४६. “स”कार गीतम् ।

सर्वबीजाक्षर शक्तिजननि ।
सर्वसाधना प्रक्रिया कारिणि ॥ पल्लवि॥

सुचींद्र शशिशेखरभामिनि
बाणासुरमर्दन तोषिणि ।
शैलेश सुकुमारि दैवगुणवर्धिनि
कन्याकुमारि कृष्णकपर्दिनि। ॥ १॥

महिषमर्दिनि धर्मसंरक्षिणि
चंडमुंडासुर शिरच्छेदिनि ।
मानवकुलकंटक प्राणिसूदनि
मृदु हृदयवासिनि। गीतसुधावनि ॥ २॥

## ४७. “ह”कार गीतम् ।

हंसतूलिकासने हंसिनी ।
हृदयगह्वरधामे कन्याकुमारि ॥ पल्लवि॥

तव दर्शनार्थं तव सम्मुखेऽहं
तिष्ठामि भावयामि दासोऽहम् ।
 तव कृपया परया धन्योऽस्मि
 नतोऽस्मि श्रितोऽस्मि शरणागतोऽस्मि ॥ १॥

अपराजिते लावण्यपूरिते
उदयरविकोटि दिप्तिसहिते ।
 विषकंधरहर चित्तापहारिणि
 गीतसुधाकरि सदानंद भक्तसौधामिनि ॥ २॥

## ४८. “क्ष”कार गीतम् ।

क्षमाप्रेमसंजीविनि पावनि
आशुशुभकारिणि निरंजनि ॥ पल्लवि॥

सदाशिव मानसोल्लासिनि
साधकोत्साह धृति श्रद्धावर्धिनि ।
 बाणासुरमर्दिनि सुलोचनि
 चिदानंदरूपिणि गीतसुधावनि। ॥ १॥

पूर्णेंदु वदने कौमारि
शशिशेखरे श्रीकन्याकुमारि ।
 सुविचारामृतवाहिनि श्रीकरि
 आसुरीगुणदमनि दयाकरि ॥ २॥

## ४९. “त्र”कार गीतम् ।

त्रयंबक नाट्ये सहनर्तकि ।
कन्याकुमारि लास्यप्रदर्शकि ॥ पल्लवि॥

सृष्टि स्थिति लय चक्रमोदिनि

व्यष्टि समष्टिविभाग रंजनि ।
    विज्ञानदुरंधर तत्त्वबोधिनि
    वासनात्रय क्षयकारिणि ॥ १॥

भोगापवर्गार्थमिदं दृश्यं
रक्षय मां सदा हृत्कंजभासिनि ।
    घंठानाद तरंग तन्मयि
    परानादमयि गीतसुधापयि ॥ २॥

## ५०. “ज्ञ”कार गीतम् ।

ज्ञानयोगं प्रद कन्याकुमारि ।
विज्ञानमुदं प्रद ध्यानगोचरि ॥ पल्लवि॥

पंचविषय याने चंचलोऽहं
भोगयोग मध्ये चपलोऽहम् ।
    अंतर्मुखाराधन भाग्यं प्रयच्छ
    बहिर्मुख धर्मार्थं स्वास्थ्यं प्रयच्छ ॥ १॥

अध्ययन चिंतन सृजनशीलोऽस्मि
मनन मंथनकर्मरतोऽस्मि ।
    गीतसुधापाने सदा रसिकोऽस्मि
    निधिध्यासनरतं मां कुरु भक्तोऽस्मि ॥ २॥

एकत्व भाव नंदने संचारिणि
अनेकत्वदर्शने त्रिलोक सम्मोहिनि ।
    त्रिपुटिरहित मुक्तिसदने एकाकिनि
    मम मृण्मय देहं चिन्मयं कुरु जननि ॥ ३॥

इति देवी कन्याकुमारि वर्णाद्याक्षर गीताञ्जलिः समाप्ता ।

Gitam for letters ङ ञ ठ ण etc. are modified.

Composed, encoded, and proofread by
Smt. Rajeshwari Govindaraj

*Devi KanyakumAri Varnadyakshara Gitanjali*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*